No. १०१२-घ

Title घटकर्परटीका अर्थदीपिका

Author कालिदासः

Extent ५ Age

Subject काव्यम्

चरखर्पटिका ~~सटीका~~ सूर्यदीपिकाख्यटीका
सहिता

१०२२

५ पत्रे

सं० १०१२-घ
घटकर्परटीका अर्थदीपिका
८ पत्राणि
कागज - संपूर्ण
लिपि - कांडि...

घ॰ क॰ टी॰ १

ॐ श्रीमते रामानुजाय नमः ॥ ॐ देव्यै नमः ॥ हे सखि नीरदैर्मेघैरागत्य खमाकाशं निचि
तं व्याप्तमित्यर्थः किंविशिष्टैर्नीरदैः प्रियहीनाहृदयावनीरदैः प्रियेण हीनाः प्रिय
हीनाः प्रोषितभर्तृका इति यावत् तासां हृदयभूमिस्तां रदंति विदारयंतीति यावत्
प्रियहीनाहृदयावनीरदास्तादृशैः न केवलं खं नचितं अपि तु क्षितौ पृथिव्यां सलि
लैः पानीयैः रजो रेणुरपि निहितः न केवलं रेणुर्निहितो रविचंद्रावपि नोपलक्षि
तौ हे सखि एवं तदपि वृत्तं वल्लभो नायात इति अंभोर्णस्तोयपानीयनीरक्षीरांबु

निचितं खमुपेत्य नीरदैः प्रियहीनाहृदयावनीरदैः सलिलैर्निहतं रजः क्षि
तौ रविचंद्रावपि नोपलक्षितौ १ हंसा नदन्मेघभयाद्द्रवंति निशामुखान्य
द्य न चंद्रवंति नवांबुमत्ताः शिखिनो नदंति मेघागमे कुंदसमानदंति २ ॥

शंबरमित्यमरः नभोंतरिक्षं गगनमनंतं सुरवर्त्म खमित्यमरः क्ष्मावनिर्मेदिनी म
हीत्यमरः रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रजः इत्यमरः १ हे कुंदसमानदंति
कुंदैः समाना दंता यस्याः सा तस्याः संबोधने कुंदसमानदंति द्रवंति गच्छंति के हंसाः
द्रवंति निशामुखान्यद्य न चंद्रवंति न चंद्रयुक्तानीत्यर्थः न केवलं निशामुखानि
कस्मात् नदन्मेघभयात् नदंतश्च ते मेघाश्च ते तेभ्यो भयं तस्मात् शब्दायमानजलधरत्रा
सादित्यर्थः न केवलं हंसा द्रवंति निशामुखान्यद्य न चंद्रवंति न चंद्रयुक्तानीत्यर्थः
न केवलं निशामुखानि चंद्ररहितानि अपि तु शिखिनोऽपि नदंति कथंभूताः शिखिनः
नवांबुमत्ताः अभिनवजलपानमत्ता इत्यर्थः क्व सति मेघागमे वर्षासमये हे सखि एत

अद्यस्मिन्काले निशि रात्रौ नभो न शोभते कथंभूतं नभः मेघावृतं मेघच्छन्नं पुनः कथं
वितारं विगतास्तारा यस्मात्तत् अभ्युपैति आगच्छति का निद्रा कं हरिं कथं हरिं सुखवसे।
वितारं सुखवसे वितं शीलमस्यास्तं सुखवसेवितारं न केवलं निद्राभ्युपैति अपि तु ज
लदो मेघो रवन् शब्दं कुर्वन् इभानां हस्तिनां संरंभमास्फोटं वहति कथं इभानां।
भूधरसन्निभानां पर्वततुल्यानामित्यर्थः हे सखि एतदपि वृत्तं परं वल्लभो नायातः
३ हे सखि दरीषु कंदरासु जलं प्रपतति कथंभूतं जलं पविधीरवं यथा स्यात्तथा
कथंभूतं जलं सतडिज्जलदार्पितं सह तडिद्भिर्वर्त्तत इति सतडितः तेभ्यो जलदा

मेघावृतं निशि न भाति नभो वितारं निद्राभ्युपैति च हरिं सुखवसेवितारं सें
द्रायुधश्च जलदो धरसन्निभानां संरंभमावहति भूधरसन्निभानां ३ सत
डिज्जलदार्पितं नगेषु स्वनदंभोधरभीतपन्नगेषु पविधीरवं जलं दरीषु प्र
पतत्यद्भुतरूपसुंदरीषु ४ ॥

भ्येतितैरार्पितं वर्षितमित्यर्थः कास्तु प्रपतति दरीषु कंदरासु दरी तु कंदरो वा स्त्री।
देवखातविले गुहा इत्यमरः कथं दरीषु अद्भुतरूपसुंदर्यो यत्र केषु नगेषु क
थं नगेषु स्वनदंभोधरभीतपन्नगेषु स्वनंतश्च ते अंभोधराश्च ते तेभ्यो भीताः पन्नगाः।
सर्पा येषु उरगः पन्नगः भोगी जिह्मगः पवनाशनः इत्यमरः हे सखि एतदपि वृत्तं।
परं वल्लभो नायातः ४ हे सखि विद्वेषी ग्रीष्मप्रतिकाले कांतासुखानि कोपि विर
लो जनः प्रसादयति प्रसन्नं करोति कथंभूतानि कांतासुखानि रतिविग्रहकोपि

घ॰ख॰ टी॰ २ तानि रतेर्विग्रहस्तस्मिन्कोपितानि रुतरतप्रसंगकोपितानीत्यर्थः उत्कंठयति उत्कंठय
न्तिके जलदा मेघाः कान्पथिकान् कथंभूते जलस्वनेन तः शब्दायमानाः शोकः
समुद्रहन्ति प्रवर्द्धन्ति कास्तत्र वनितास्तु कथंभूतो शोकः अनंतः नविद्यते अंतोयस्य
2 सनंतः पतपिवत्तेवल्लभोनायातः ५ उद्यते कथ्यते किंतत्वचसमाणं कयाप्रोषि
तप्रमदया गतभर्तृकया कस्मिन्सति भावने किरणसमूहे छादिते सति कस्मिन् दिनकरस्य
नकेवलं भावने छादिते खांजले पतति सति आकाशात्पानीये पतति सति कथंभूते

ह्रिद्धप्रसादयति संप्रति कोपितानि कांतामुखानि रतिविग्रहकोपितानि ।
उत्कंठयंति पथिकान् जलदाः स्वनंतः शोकः समुद्वहति तद्वनितास्वनंतः
५ छादिते दिनकरस्य भावने खांजले पतति शोकभावने मन्मथेच हृदि
हृत्तमुद्यते प्रोषितप्रमदयेष्टमुद्यते ६ सर्वकालमबलं ब्यतोयदा आगता
स्यदपितोगतोयदा निर्घृणेन परदेशसेविना मारयिष्यथ हतेन माविना
७ ॥

पानीये शोकभावने शोकस्य भावना यत्र तस्मिन् शोकोत्पादक इत्यर्थः नकेवलं
पानीये पतति सति कामे पि हृदि हृत्तमुद्यते सति ६ अतो भो मेघाः सर्वकालम
वलं व्यबद्धकालं प्रतीक्ष्य यस्मिन्काले दयितो वल्लभो गतस्तदा आगतास्यथ यदा मा राम २
रयिष्यथ के यूयं कामां कथं विना केन वल्लभेन निर्घृणेन निर्गतात्कृपात् दयाया स्या
सौ नि· तेन पुनः कथंभूतेन परदेशसेविना परदेशरतेनेत्यर्थः ७ भो मेघास्ते
पथिकपांशुलपथिकाद्यमं वल्लभं प्रतिरूपमेव ब्रूतः कथयत तत कारणात् ।

सि३

स्वयंशीघ्रलंघनाः शीघ्रेणलंघयतीति कामचारिण इत्यर्थः क्व पथि मार्गे किंभूतं भोप
थिकपांशुलमुच्यतां त्यक्ता का अन्यदेशरतिः क्व सति अस्मिन्वर्षाकाले सति अ
थवेतिपक्षांतरे सावधूः किमुच्यतामिति वल्लभं प्रति स्वयमेव ब्रूते इत्यर्थः ८ भोप्राव
मूर्ख त्वं माधवे वैशाखे मासे निर्गतो सि प्रचलितो सि कथंभूते माधवे कोकिलास्व
नचकोरकूजिते कोकिलाध्वनि चकोरकूजितं च ते विद्यते ऽस्मिन्माधवे मन्मथेन
कामेन सकलसमस्ते जने लोके जिते सति हे प्राव हे मूर्ख त्वं न उपयासि न आगच्छसि

भूतं तं पथिकपांशुलंघना स्वयमेव पथि शीघ्रलंघनाः अन्यदेशरतिरद्य मुच्य
तां मानवानववधूः किमुच्यतां ८ कोकिलास्वनचकोरकूजिते मन्मथेन सक
ले जने जिते निर्गतो सि प्राव मासि माधवे नो पयासि शयने पि माधवे ९ हंसपं
क्तिरद्य नाथ संप्रति प्रस्थिता वियति मानसं प्रति चातको पि तृषितोंबु याचते दुः
खिता पथिक सा प्रिया च ते १० शाद्वजालमति भाति कोमलं वारि विंदति च चा
तकोमलं अंबुदैः शिखिगणो विनाद्यते का रतिः प्रियमया विनाद्य ते ११ ॥

क्व सति माधवे श्रीकृष्णे शायिते पि सति वर्षासमागते पीत्यर्थः ९ भो नाथ भो स्वामिन्
हंसपंक्तिः हंसावली संप्रति काले मानसं सरोवरं प्रति प्रस्थिता चलिता क्व वियति आ
काशे हे नाथ केवलं सा चलिता तृषितः पिपासितश्चातको पि अंबु पानीयं याचते न
केवलं चातको अंबु याचते अपि तु हे पथिक सा प्रिया च दुःखिता स्मितकस्पतेन वर्तते १०
भो पथिक अथ अस्मिन्काले शाद्वजालं वालतृणसमूहः अतिभाति अस्तकर्षेण शोभ
ते कथंभूतं शाद्वजालं अतिकोमलं तत्त्वानि वारिणा नीयं विंदति लभंते च पुनः कोमो

च॰ख॰ टी॰ ३

3

चातकः कथंभूतं वारिअमलं निर्मलं नकेवलं चातकोदुर्लभते अपितुविनाघनेस
मयूरः काङ्क्षते कः शिखिगणः मयूरसमूहः अं तु दैमेघैः तथा च सति हे प्रिय अन्यदे
शोकारनिर्भवति कथं विनाकयामयाकस्य तेन वल्लतिगमद्वल्लभइतेनिपूर्णोन्वयः ११
भोप्रियवर्त्ततेकेकलापिनोमयूराः कथंभूताः मयूराः मेघशब्दमुदितामेघध्वनिहृ
र्षिताइत्यर्थः पुनः कथंभूताः मे॰ शोषिताहृदयशोककलापिनः विरहिण्याश्चित्तसंता
पोस्यादिनइत्यर्थः क्व॰ अथास्मिन्वर्षाकालेमाघतेदीयतेकासावल्लभाकस्यतेतवके
नमदेनकामेनकथंभूतेन॰ दुर्द्धरेणदुःखेनध्रियतइतिदुर्द्धरस्तेन कथंभूतामातो य

मेघशब्दमुदितांकलापिनः शोषिताहृदयशोककलापिनः तोयदागमकृशाव
घाद्यते दुर्द्धरेणमदनेनसाद्यते १२ किंकृपापितवनास्तिकांतयापांडुगंडप
तितालकांतया शोकसागरजलेद्यपातितांत्वद्गुणस्मरणमेवपातितां १३

तोयदागमकृशातोयंददातीतितोयदामेघास्तेषामागमनेनकृशाद्रुबला पुनः कसाव
ल्लाभवल्लाहृदयेत्यर्थः १२ भोगनाथ नास्तिनभवतिकाकृपादयाकांतयावल्लभया
कथंभूतयापांडुगंडपतितालकांतया पांडोचतौगंडौचेतिपांडुगंडौतयोः पतिता अ
लकानामंतायस्यास्तयाअंतरंचपातिवत्तेति किंत्वद्गुणस्मरणंकांतांप्रियां कथंभू
तांप्रियांपतितां कस्मिन्शोकसागरजलेशोकएवसागरजलंतस्मिन् क्व॰ अद्यास्मि
न्कालेभोघनामद्वल्लभप्रतिदूत १३ भोप्रियमांनसमुपेक्षसे कथंभूतांमांदीनांदुः
खितां कदा॰ काननेषुकुरुस्वमिनकूटजेषु सत्सुकुरुस्वमितानिकूटजानियेषु वनेषु

राम ३

च पुनः प्रियरहितेषु प्रियेण रहितेषु पुनः कथंभूतेषु समुत्सुकाननेषु सम्यगुत्सुका-
नि आननानि येषां तेषु अपरं क्व सति वहति सति किं जलं पानीयं कथंभूतं जलं कलु-
षं आविलं मिश्रितं कासां नदीनामित्यर्थः ॥ हे सखि प्रियवियोगजशोकदाहं दहसां क
सहं परित्यजेयं प्रियस्य वियोगः तस्माज्जातः प्रियवियोगजः स चासौ शोकश्च तस्मा-
द्दाहस्तं कथंभूता अहं गंभीरमेघरसितव्यथिता गंभीरेण मेघानां रसितेन शब्देन व्यथि-
ता पीडिता कदा॰ मार्गेषु विनाशितेषु केन मेघसत्वित्वेन स्पशाति कोसौ कामं किं

कुसुमितकुटजेषु काननेषु प्रियरहितेषु समुत्सुकाननेषु वहति च कलुषं जलं
नदीनां किमिति च मां समुपेत्य सेन दीनां २४ मार्गेषु मेघसलिलेन विनाशितेषु
कामो धनुः स्पृशति तेन विनाशितेषु गंभीरमेघरसितव्यथिता कदाहं जह्यां स-
खि प्रियवियोगजशोकदाहं २५ नववारिकणैर्विराजितानां स्वनदंभोधरवात-
वीजितानां मदनस्य कृते निकेतनानां प्रतिभात्यघ वनानि केतकानां २६ ॥ ॥

धनुः कथं विना केन वल्लभेन कथंभूतं धनुः शितेषु शितानि इषवो बाणा यस्य तत् २५
हे सखि अस्मिन्काले केतकानां वनानि प्रतिभाति प्रतिशोभांते पुनः कथंभूतानां स्वन-
दंभोधरवातवीजितानां स्वनंतश्च ते अंभोधराश्चेति तेषां वातेन वीजितास्तेषां पुनः क-
थंभूतानां निकेतनानां गृहाणां कस्य कृते मदनस्य कामस्य निमित्ते कृतानां एतदपि
वृत्तं गतमर्त्तकयाऽघ्यते २६ हे सखे कोहं त्वया वा प्रजापतिब्रह्मा ससर्ज तत्त्वमु-
तरां साधु भणं कथंभूतस्त्वं कामनिवासः कंदर्पस्य स्थानभूतस्तत् संबोधने का-
मनिवासः पुनः कथंभूतस्त्वं नेत्रोत्सव नेत्राणामुत्साहकारकः केषां सयौवनानां

ग॰ख॰
टी॰
४
५

तरूणानां पुनः कथंभूतस्त्वं प्रवरः श्रेष्ठः केषां मध्ये पुनः कथंभूतस्त्वं युक्तः कामिमंजरी
भिः एतेनेतदुक्तं भवति विरहानलेन पीड्यमानापि पुष्पितसज्जे मद्धीकरेणाक्रमेनाधि
कपीडिता १७ हे नवकदंबतरो ते नवशिरो अवनतास्मि शिरसा अवनतास्मि शिरो अवन
ता ते तव कुसुमस्मितं ईषद्धसितं तस्मिन्मदनः कंदर्पो वसति अपरं च भो कुटज किं अ
वस्यते कैः कुसुमैः ते तव प्रणयितामि नमस्करोमि कथंभूतस्य ते दुःप्रसहस्य दुःखे
न प्रसह्यते दुःप्रसहस्य १८ हे तरूवर महीसुमोन्नमते तव पदे विनतास्मि प्रणतास्मि

तन्मा पुनः प्रयोः स्तुतरां समज्ञे प्रजापतिः कामनिवाससज्ञे तवमंजरीभिः प्रवरोऽव
नानां नेत्रोत्सवश्रीसि स यौवनानां १७ नवकदंबशिरोवनतास्मि ते वसति तो
मदनः कुसुमस्मिते कुटज किं कुसुमैरवहस्यते प्रणयितामि चतुःप्रसहस्य
ते १८ तरूवर विनतास्मि ते सदा हृदयं मे प्रकरोषि किं सदाहं तवपुष्पनिरी
क्षितापदेहं विसृजेयं सहसैव नीपदेहं १९ कुसुमैरुपशोभितां सितैर्घनमुक्तो
डुलवप्रकाशितैः अधुनासमवेक्ष्य कालतां भ्रमरं भ्रमतीति यूथिकालता २०

मे मम हृदयं किं सदाहं करोषि दाहेन सह वर्त्तते सदाहं सं भो नीप सहसा तत्क्षणादेव
देहं शरीरं विसृजेयं त्यजामि कथंभूताहं तव पुष्पनिरीक्षितातवपुष्पेनिरीक्षितयस्याः
सा तथेति कोपेन पीडितया विरहिन्या कदंबवृक्षं प्रति इदमुच्यते १९ हे सखि अस्मिन्
काले कालता कालस्वभावं समवेक्ष्य ज्ञात्वा भ्रमरोपि यूथिकालतां भवति कथंभूतां
यूथिकालतां कुसुमैः कलशोभितां कथंभूतैः कुसुमैः सितैः पुनः कथंभूतैः घनमु
क्ताडुलप्रकाशितैः घनैः मुक्ताः अभ्रुलवास्तैः प्रकाशितैः एतेनयुक्तं भवति अज्ञा।

राम
४

घ॰ ख॰ टी॰ ५ नोपि भ्रमरोपि समयं जानाति स वल्लभो न जानातीत्यर्थः २० हे सखि पथावर्षाऋतुः
तासां योषितां फलः यावद्दिनेषु वर्षावासरेषु रतस्त्वं प्रियतमैः सह न आनयंति क
थंभूतेषु दिनेषु संप्राप्तधाराधरगर्जित दुर्दिनेषु तेषां पुरुषाणामयमृतुः सफलया।
प्रियसखीसमानयंति २१ अहं श्रायेयं शपथं करोमि कैः भवानुरक्तवनितासुरतै

5

तासामृतुः सफल एव द्वियादिनेषु संप्राप्तधाराधरगर्जित दुर्दिनेषु रत
स्त्वं प्रियतमैः सह मानयंति मेघागमे प्रियसखीश्च समानयंति २१ भ
वानुरक्तवनितासुरतैः शपेय मालभ्य चांबु तृषितः करकोशपेयं जीये
य येन कविना यमकैर्पदेरणातस्मै वहेयमुदकं घटखर्परेण २२ ॥

भावानुरक्तवनितामपि न ब्रजामि तृषितोपि सन् करकोशपेयमंबु चालभ्य शपेयं ता राम
वत्रपि च मियावत्तस्मै कवये घटखर्परेण सलिलं नोद्वहेयम् तस्मै कस्मै कविना ५
अहं मतयमकैर्जीयेय २२ इति श्रीटीकायां घटखर्परदीपिकायां संगोपांगास
माप्ता ॥ शुभमस्तु ॥